तस्य पर्य्यायः ।

"वो वाणो वारुणी सूक्ष्मा वरुणो देव-
संज्ञकः ।
सोयं सान्तश्च वामांशः ॥" इति बीजवर्णाभि-
धानम् ॥ * ॥ अपि च ।

"वकारो वरुणो वाणः खेदः खड्गीश्वरो जवः ॥"
इति रुद्रयामले मन्त्रकोषः ॥ * ॥

अपि च ।

"वो वाणो वारुणी सूक्ष्मा वरुणो देवसंज्ञकः ।
खड्गीशो ज्वालिनी वक्षः कलमध्वनिवाचकः ॥
उत्कारीशस्तु नावीतो वक्षा स्फिक् सागरः
शुचिः ।
त्रिधातुः शङ्करः श्रेष्ठो विशेषो यमसादनम् ॥"
इति नानातन्त्रशास्त्रम् ॥

तस्य स्वरूपं यथा,—

"वकारं चञ्चलापाङ्गि कुण्डली मोक्षमव्ययम् ।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा ॥
त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम् ।
पञ्चदेवमयं वर्णं पीतविद्युल्लतामयम् ॥
चतुर्व्वर्गप्रदं वर्णं सर्व्वसिद्धिप्रदायकम् ।
त्रिशक्तिसहितं देवि ! त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रम् ॥ * ॥

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—

"कोणत्रययुता रेखा ब्रह्मविष्णुशिवात्मिका ।
माया शक्तिः परा नित्या ध्यानमस्य प्रचक्ष्यते ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य ध्यानम् ।

"कुन्दपुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम् ।
शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम् ॥
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम् ।
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥

व, व्य, इवार्थः । इति मेदिनी । वे, १ ॥ ( यथा, रघुः । ४ । ४२ ।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं व यशः पपुः ॥")

वं, क्ली, ( वा ल गमनहिंसयोः + कः ।) प्रचेताः । इति मेदिनी । वे, १ ॥ वरुणबीजम् । इति तन्त्रम् ॥

वः, पुं, ( वानमिति । वा + भावे घः । ) सान्त्वनम् । ( वाति गच्छतीति । वाल गमने + कः ।) वायुः । वरुणः । इति मेदिनी । वे, १ ॥ बाहुः । मन्त्रणम् । कल्याणम् । बलवान् । वसतिः । वरुणालयः । इति शब्दरत्नावली ॥ शार्द्दूलः । वस्त्रम शालूकः । वन्दनम् । इति नानार्थकोषः ॥

वः, [ स् ] त्रि, युष्मान् । युष्मभ्यम् । युष्माकम् । युष्मच्छब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्तरूपोऽयम् । इति व्याकरणम् ॥ ( यथा, मुग्धबोधे ।
"पूणा नु वो नोऽपि हरिर्धनं वो
दद्यात् नो हन्त्वशुभानि वो नः ॥"

पादवाक्यादौ तु अस्य प्रयोगो न भवति । इति वैयाकरणिकाः ॥ )

वंशः, पुं, ( वमति उद्गिरति पुरुषान् वम्यते इति वा । टु वम उद्गिरणे इति धातोर्यद्वा वन शब्दे इति धातोर्बाहुलकात् शः । यद्वा, वष्टि उश्यते इति वा । वश कान्तौ + अच् घञ् वा । ततो नुम् । ) पुत्रपौत्रादिः । तत्पर्य्यायः । सन्ततिः २ गोत्रम् ३ जननम् ४ कुलम् ५ अभिजनः ६ अन्वयः ७ अन्ववायः ८ सन्तानः ९ । इत्यमरः । २ । ७ । १ ॥ निघनम् १० जातिः ११ । इति जटाधरः ॥ कुलस्य विद्यया जन्मना वा प्राणिनामेकलक्षणः सन्तानो वंश इति जयादित्यः । धनेन विद्यया वा ख्यातस्यापत्यधारा वंश इति सुभूः । वमति उद्गिरति पूर्व्वपुरुषान् वंशः नाम्नोति शः । इत्यमरटीकायां भरतः ॥ * ॥ ( यथा, रघुः । १ । २ ।
"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥"
पुत्त्रः । यथा, भागवते । ९ । २ । १७ ।
"नृपस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥")
तृणजातिविशेषः । वाँश इति भाषा । तत्पर्य्यायः । त्वक्सारः २ कर्म्मारः ३ त्वचिसारः ४ तृणध्वजः ५ शतपर्व्वा ६ यवफलः ७ वेणुः ८ मस्करः ९ तेजनः १० । इत्यमरः । २ । ४ । १६० ॥ किष्कुपर्व्वा ११ । इति जटाधरः ॥ वम्भः १२ । इति शब्दरत्नावली ॥ तृणकेतुकः १३ कण्टालुः १४ कण्टकी १५ महाबलः १६ दृढग्रन्थिः १७ दृढपत्रः १८ धनुर्द्रुमः १९ धानुष्यः २० दृढकाण्डः २१ ॥ ( यथा, ऋतुसंहारे । २ । २५ ।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥" )
अस्य गुणाः । अम्लत्वम् । कषायत्वम् । किञ्चित्तिक्तत्वम् । शीतलत्वम् । मूत्रकृच्छ्र-प्रमेहार्शःपित्तदाहास्रनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"वंशः सरो हिमः स्वादुः कषायो वस्तिशोधनः ।
छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् ॥ * ॥
तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफकृत् स्वादुर्व्विदाही वातपित्तलः ॥
तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा उष्णाः बद्धमूत्राः कफापहाः ॥"
इति भावप्रकाशः ॥ * ॥
( गृहोर्द्धकाष्ठम् । यथा,—
"वंशः पृष्ठास्थि गेहोर्द्धकाष्ठे वेणौ गणे कुले ॥"
इति रघुटीकायां मल्लिनाथधृतकेशवः । ७ । ३९ ॥)
पृष्ठावयवः । पिठेर दाँड़ा इति भाषा ॥ (यथा, भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ॥" )
वर्गः । इति मेदिनी । शे, १३ ॥ ( यथा, रघुः । ७ । ३९ ।
"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः ॥" )
वाद्यभाण्डविशेषः । इति धरणिः ॥ वाँशी इति भाषा ॥ ( यथा, रघुः । २ । १२ ।
" स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चै-
रुद्गीयमानं वनदेवताभिः ॥"
विवृतिरस्य वंशीशब्दे द्रष्टव्या ॥ ) इक्षुः । सालवृक्षः । इति राजनिर्घण्टः ॥ ( प्राधागर्भसम्भूताप्सरोविशेषे, स्त्री । यथा, महाभारते । १ । ६५ । ४६ ।
"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम् ।
अनूपां सुभगां भासीमिति प्राधा व्यजायत ॥")

वंशकं, क्ली, ( वंश इव कायतीति । कै + कः । अगुरु । इति हारावली । १०४ ॥

वंशकः, पुं, ( वंश इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । ) मत्स्यविशेषः । इति शब्दमाला ॥ वाँशपातामाछ इतिभाषा ॥ इक्षुविशेषः । इति रत्नमाला ॥ वाँशार इति सामशाड़ा इति च भाषा ॥ अस्य गुणाः ।
"वंशकस्त्वनभिष्यन्दी लघुर्द्दोषत्रयापहः ॥"
इति राजवल्लभः ॥
(यथा, सुश्रुते । १ । ४५ ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ॥"
"अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा ।
आभ्यां तुल्यगुणः किञ्चित् सक्षारो वंशको
मतः ॥" )
( ह्रस्वो वंशः । "संज्ञायां कन् ।" ५ । ३ । ८७ । इति कन् । क्षुद्रवंशः । इति सिद्धान्तकौमुदी ॥ )

वंशकफं, क्ली, आकाशोड्डीयमानसूत्रम् । यथा,—
"वृद्धसूत्रकमित्याहुरिन्द्रतूलं मनीषिणः ।
ग्रीष्महासं वंशकफं वाततूलं मरुद्ध्वजम् ॥"
इति हारावली । २३ ॥

वंशकर्पूररोचना, स्त्री, ( कर्पूर इव रोचते शोभते इति । रुच् + ल्युः । ततः षष्ठीतत्पुरुषः । ) वंशरोचना । इति राजनिर्घण्टः ॥

वंशक्षीरी, स्त्री, (वंशस्य क्षीरमिवास्या अस्तीति । अच् । गौरादित्वात् ङीष् ।) वंशरोचना । इति राजनिर्घण्टः ॥

वंशजः, पुं, ( वंशाज्जायते इति । जन् + डः । ) वेणुयवः । इति राजनिर्घण्टः ॥

वंशजः, त्रि, ( वंशात् सद्वंशाज्जायते इति । जन् + डः ।) सद्वंशजातः । तत्पर्य्यायः । बीज्यः २ वंश्यः ३ । इति हेमचन्द्रः । ३ । ३७७ ॥ (वेणूत्पन्नोऽपि । यथा, आर्य्यासप्तशत्याम् । ४७९ ।
"यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्व्वाणम् ।
किं कुम्भस्तन्निहितं धनुः पदे देवराजेन ॥" )